National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(67): 29 -31
© 2026 NJHSR
www.sanskritarticle.com

**Madhu Sudan Saha**
Research Scholar,
National Sanskrit University,
Tirupati.

# चित्रनैषधकाव्ये मूलकथा तोलनम्

**Madhu Sudan Saha**

नलकथा कलिकल्मषहारिणी इति प्रसिद्धा, ततः तस्यां दर्शितादराः पूर्वे बहवः कवयः नलचरित्र-वर्णनात्मकानि काव्यानि रचयामासुः। त्रिविक्रमभट्टेन A.D. दशमशतके निर्मितं"नलचरितनाटकम्" आद्यं स्यात्। श्रीहर्षेण कृतं द्वाविंशतिसर्गात्मकं "नैषधीयचरितम्"नलकाव्येषु सार्वभौमम्। त्रयोदशशतके वामनबाणभट्टेन विरचितं नलाभ्युदयं नलचरितं च उपलब्धम्। एवं दशाधिकेषु नलकथाकाव्येषु सत्स्वपि "पुण्यश्लोकस्य चरितम् उदाहरणमर्हति "इत्यालङ्कारिकोक्तिमनुसृत्य नलकथामेव आश्रित्य शङ्करकविः चित्रनैषधनामकं काव्यम् अपूर्वरीत्या बन्धकविता लक्षणयुक्तं रचयामास। नलचरिते कीदृशी परिवृत्तिः कविना कृता इति निर्णेतुं महाभारते वनपर्वणि स्थिता नलकथा अत्रोदाह्रियते।

**मूलकथा**

महाभारते वनपर्वणि द्विपञ्चाशत्तमाध्यायात् आरभ्य अशीतितमाध्यायपर्यन्तं नवशताधिकैः श्लोकैः एकोनत्रिंशदध्यायेषु समग्रा नलकथा वर्णिता। पाशुपतप्राप्तये अर्जुने गते विषण्णः युधिष्ठिरः तत्रागतं महर्षिं बृहदश्वम् एवं पृष्टवान्। "मया तीव्राः व्यथाः अनुभूताःमादृशः अन्यः दुःखभाक् लोके न भविष्यति " इति ।

ततो बृहदश्वः कीयत् ते दुःखं कृतयुगे नलः त्वत् दुःखादधिकं महत् दुःखमनुभूतवान्। त्वम् इदानीं भ्रात् सहितः भार्यया च अनुगतः वर्तसे। नलः राज्यवियुक्तः, भार्यावियुक्तः प्राप्तरूपान्तरः परेषां सेवको भूत्वा महत् दुःखमनुबभूव ।

**यद्ब्रवीष महाराज न मत्तो विद्यते क्वचित्।**
**अल्पभाग्यतरः कश्चित्पुमानस्तीति पाण्डव।।**
**अत्र ते वर्णयिष्यामि यदि शुश्रूषसेऽनघ।**
**यस्त्वत्तो दुःखिततरो राजासीत्पृथिवीपते।।**
**निषधेषु महीपालो वीरसेन इति श्रुतः।**
**तस्य पुत्रोऽभवन्नाम्ना नलो धर्मार्थकोविदः।।**
**स निकृत्या जितो राजा पुष्करेणेति नः श्रुतम्।**
**वनवासं सुदुःखार्तो भार्यया न्यवसत्सह।।**
**न तस्य दासा न रथो न भ्राता न च बान्धवाः।**
**वने निवसतो राजञ्छिष्यन्ते स्म कदाचन।।**
**भवान्हि संवृतो वीरैर्भ्रातृभिर्देवसंमितैः।**
**ब्रह्मकल्पैर्द्विजाग्र्यैश्च तस्मान्नार्हसि शोचुतुम्।।**[1]

विदर्भदेशे भीमनामकः राजा आसीत् । तस्य त्रयः पुत्राः एकैव पुत्री दमयन्ती बभूवुः।

सखीभ्यः श्रुतवलगुणा दमयन्ती नले अनुरक्ता बभूव। नलोपि नानादेशागतेभ्यः दमयन्ती गुणान् श्रुत्वा तस्यां जातानुरागो बभूव। सपदि विरहपीडितोऽभूत् विरहासहिष्णुः नलः उद्यानविहारार्थं गतः, तत्र

**Correspondence:**
**Madhu Sudan Saha**
Research Scholar,
National Sanskrit University,
Tirupati.

सुवर्णपक्षं हंसमेकं ददर्श। नलेन गृहीतः हंसः **ते प्रियं करिष्यामि न मां जहि** इति नलमनुनीतवान्। दमयन्तीं त्वया योजयामि इति प्रतिज्ञाय नलेन मुक्तः हंसः विदर्भान् जगाम। नगरोद्याने हंसः दमयन्तीं ददर्श। दमयन्ती तं गृहीतुं कृतयत्नापि विफला बभूव। ततः हंसः दमयन्तीमेवम् उवाच - **नाहं भवादृशैः ग्राह्यः किन्तु ते सौन्दर्यं नलस्यानुरूपं तेन त्वां योजयामि** इति दमयन्तीम् उक्त्वा तस्याः सम्मतिं प्राप्य पुनः नलान्तिकं जगाम। दमयन्तीं नलासक्तचेतस्कां नलं जगाद। दमयन्त्याः विरहव्यथा अधिका जाता। भीमराजः दमयन्त्याः स्वयं वरं घोषितवान्। अत्रान्तरे नारदः स्वर्गं जगाम, भूलोकात् संग्रामे हताः वीराः किमर्थं स्वर्गं जगाम, भूलोकात् संग्रामे हताः वीराः किमर्थं स्वर्गं नागताः इति इन्द्रेण पृष्टः नारदः तमेवम् उवाच। नारदः भूलोके दमयन्त्यासक्तचेतस्काः राजानः संग्रामविमुखाः इत्युक्त्वा दमयन्त्याः अपूर्व सौन्दर्यं वर्णितवान्। ततः चत्वारः दिक्पालाः अपि दमयन्ती स्वयंवरार्थं भूलोकं प्रतस्थिरे।

मार्गे दमयन्ती स्वयंवरार्थं गच्छन् नलः तैः दृष्टः। दिक्पालाः नलं - **अस्माकं दूतो भूत्वा दमयन्ती समीपं गच्छ, अस्मासु अन्यतमं यथा दमयन्ती वृणीते तथा सा त्वया अनुनेया** इत्यपि ऊचुः। नलोऽपि दिक्पालैः तिरस्करणी विद्यया अनुगृहीतः अदृश्यः दमयन्ती समक्षं जगाम, दमयन्ती नलदौत्यं तिरश्चकार। स्वयंवर प्राङ्गणे चत्वारः दिक्पालाः नलरूपधराः भूत्वा नलस्यैव पार्श्वे उपविष्टाः। दमयन्ती नलं ज्ञातुमशक्ता देवान् प्रार्थितवती ततः दमयन्त्यै प्रीताः देवाः स्वैः रूपैः तत्र स्थिताः। दमयन्ती नलं भर्तारं वव्रे।

एतावत् पर्यन्तैव कथा श्रीहर्षभट्टेण नैषधीयचरिते, शङ्करकविना चित्रनैषधकाव्ये च गृहीता। अनन्तरकथापि महाभारते वर्तते।

दमयन्ती स्वयंवरं श्रुत्वा कलिः अपि विलम्बेन भुवमागतवान् तस्यागमनात्प्रागेव नलदमयन्त्योः विवाहः अपि अभूत्। कलिः नले जातद्वेषः तस्मात्कारणात् नलः कलिना आविष्टः स्वदायादेन पुष्करेण द्यूते पराजितः। राज्यभ्रष्टः नलः पुत्रौ विदर्भान् गमयित्वा दमयन्ती द्वीतीयः वनं जगाम। नलेन वियुक्ता दमयन्ती पितृगृहं गत्वा सुखिनी भविष्यति इति निश्चित्य निद्रागतायां दमयन्त्यां तां परित्यज्य कुत्रापि ययौ ।

नलवियोगेन दुःखिता दमयन्ती स्वमातुः श्वश्रुः चेदि राज्याः अन्तःपुरं प्राप्तवती। तां भगिन्याः पुत्रीं विज्ञाय सापि दनयन्तीं विदर्भान् प्रेषयामास। अत्रान्तरे नलः अग्निना आक्रान्तं कर्कोटकं रक्षितवान् , कर्कोटकोऽपि नलं दष्टवान्। ततो नलः विरूपी बभूव ततः कर्कोटकः नाहं कृतघ्नः रूपपरिवृत्तिः ते उपकारिणी भविष्यति निवृत्तासु आपत्सु मां स्मर तदानीं त्वां सहजरूपेण योजयिष्यामि इत्युक्तवान्। नलः अयोध्यां गत्वा ऋतुपर्णस्य पाचको बभूव। भीमप्रेषितैः चारैः नलः अयोध्यायां वर्तते इति ज्ञात्वा नलं विदर्भान् आनेतुं दमयन्ती उपायं चिन्तितवती। दमयन्त्याः द्वितीयः स्वयंवरः श्वः भविता इति केवलं ऋतुपर्णमुद्दिश्य वार्ता प्रेषिता। एकाह्ना कुण्डिनगमनम् असाध्यं मत्वा ऋतुपर्णः चिन्ताक्रान्तः। बाहुक नाम्ना ऋतुपर्णस्थाने स्थितः नलः त्वामहं कुण्डिलं नेष्यामि इति उक्त्वा अपरेद्युः तं कुण्डिनं प्रापयामास। मार्गे ऋतुपर्णः नलात् ददौ। दमयन्ती नलेन पक्वान् पदार्थान् रहसि आनीतान् आस्वाद्यं तं नलं निश्चिकाय। कथञ्चित् पुनः नलदमयन्त्योः समागमः अभूत्। अक्षहृदयाभिज्ञः नलः पुनः पुष्करं विजित्य राजाभूत्। कर्कोटकः नलं पुनः सुन्दररूपेण योजयामास। कर्कोटक विषाग्निदग्धः कलिः निषधेभ्यः पलायितः। नलदमयन्त्योः विवाहान्तरकथा न कस्मिन्नपि नलचरितकाव्ये कविभिः गृहीता। केवलं वामनबाणभट्टेन नलाभ्युदयकाव्ये सप्तमसर्गे अष्टमसर्गे च वर्णिता ।

शङ्करकविः मूलकथां महाभारतादेव गृहीत्वा श्रीहर्षं वामनबाण-भट्टं च मार्गदर्शनं कृत्वा चित्रनैषधं रचितवान्। चित्रनैषधे वर्णिताः नलपराक्रमः, उद्यानगमनं, हंसदर्शनं, हंसेन दमयन्ती रूपवर्णनं, हंसप्रतिज्ञा, हंसेन विदर्भगमनम्, दमयन्तीं प्रति हंसवचनम्, दमयन्त्यां देवानामासक्तिः, नलदौत्यं, स्वयंवरागमनं, दमयन्त्या कृतं देवप्रार्थनं, देवानां प्रसादः, नलदमयन्त्योः विवाहः इति विषयाः प्रायशः सर्वेषु काव्येषु साधारणाः।

हर्षनैषधीयचरितं प्रमाणेन बृहदिति हेतोः तस्मिन् वर्णनाधिक्यं दृश्यते। शङ्करकविः संक्षेपेण काव्यं चिकीर्षति इति हेतोः सर्वे अंशा संक्षिप्ताः। किन्तु न कोऽपि विषयः परित्यक्तः। स्वपूर्ववर्तीनि सर्वाणि नलचरितकाव्यानि शङ्करकविना दृष्टानि स्युः। यतः काव्यरम्भे नलवर्णनं नैषधस्य नलवर्णनस्य स्मारयति ।

सर्वाः स्त्रियः नलं पति प्राप्तुमिच्छवः इति कवि कृतं वर्णनं नैषधस्थं श्लोकमनुकरोति।

**नयभाजि नरोत्तंसे बलाद्यत्र वितेनिरे ।**
**धियमाजिसरोहंसे बाला नेत्रगते स्मरे ।।**[2]

यथा हर्षनैषधे –

**न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तम्।**
**तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम् ।।**
**श्रियास्य योग्याहमिति स्वमीक्षितुं करे तमालोक्य सुरुपया धृतः।**
**वीहाय भैमीमपदर्पया कया न दर्पणः श्वासमलीमसः कृतः।।**[3]

स्वयंवपकाले देवानुद्दिश्य दमयन्त्याः परिदेवनप्रकारः महाभारता-नुकारी। महाभारते सप्रकारः पञ्चभिः श्लोकैः वर्णितः। तत्र बहुभिः श्लोकैः वर्णिता दमयन्ती परिदेवनव्यथा भावपरिवृत्या भारतादपि करुणरसाभिव्यञ्जिका वर्तते।

**शरणं प्रति देवानां प्राप्तकालममन्त्यत।**
**वाचा च मनसा चैव नमस्कारं प्रयुज्य सा।।**
**देवेभ्यः प्राञ्जलिर्भूत्वा वेपमानेदमब्रवीत्।**
**हंसानां वचनं श्रुत्वा यथा मे नैषधो वृतः।।**
**पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे।**
**मनसा वचसा चैव यथा नाभिचराम्यहम् ।।**
**तेन सत्येन विबुधास्तमेव प्रदिशन्तु मे।**
**यथा देवैः समे भर्ता विहितो निषधाधिपः।।**
**तेन सत्येन मे देवास्तमेव प्रतिशन्तु मे।।**
**यथेदं व्रतमारब्धं नलस्याराधने मया।**

**तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे।।**
**स्वं चैव रूपं कुर्वन्तु लोकपालामहेश्वराः।।**
**यथाऽहमभिजानीयां पुण्यश्लोकं नराधिपम्।।**[4]

शङ्करकवेः काव्ये दमयन्ती **स्वां प्रति नियतिः विमुखा** इत्येव निर्वेदं दर्शयिन्ती देवेषु कारणम् उत्पादितवती। यथा –

**किमहीनच्छलोद्दामा चित्रा नियतिरीहते।**
**या मदेन विलोला मामत्रालीय परीक्षते।।**
**विश्वतो निर्मलाकूता नैकसन्मन्त्रनिर्भराः।**
**ईश्वरो निखिला जातास्ते कस्मान्मयि निष्ठुराः।।**
**वैयग्र्यमाश्रये वाचि स्रवन्ति मम निर्दयाः।।**
**गतिरत्र परा तस्मान्नलान्मे न मनोरमात्।**
**भाति चित्रतरा यस्मादिला मानधनोत्तमात्।।**[5]

विवाहवर्णने स्थेमार्थं वधूवराभ्यां पादेन शिलापीडनं कविना यद्वर्णितं तत् हर्षनैषधकाव्यम् अनुकरोति ।

**ग्रावा स्थेमकरो यज्ञे ललनापदमण्डितः।**
**प्रवालमधुरो जज्ञे नलस्य परमद्भुतः।।**[6]

**यथा च नैषधीयचरिते –**

**स्थिरा त्वमश्मेव भवेति मन्त्रवागनेशदाशास्य किमाशु तां ह्रिया ।**
**शिला चलेत् प्रेरणया नृणामपि स्थितेस्तु नाचालि विडौजसापि सा ।।**[7]

अपि च नलदमयन्त्योः विवाहात्पूर्वं विरहकाले वर्ष ऋतुवर्णनं शरद्वर्णनं च यदृष्टं तद्वर्णनद्वयं वामनबाणभट्टकृते नलाभ्युदयेपि दृष्टम्। महाभारते नैषधीयचरिते वा तद्वर्णनद्वयं न वर्तते।

एवं पूर्वकाव्यानि सम्यक् दृष्ट्वा स्वप्रतिभां चित्रकवित्व कल्पनदक्षां कथया मेलयित्वा शङ्करकविः चित्रनैषधकाव्यं नर्ममे।

**पाद टिप्पणी**

[1]महाभारतम्- अरण्य-53-51,52,55-58

[2]चित्रनैषधम्-1-7

[3]नैषधम्- 1-30,31

[4]महाभारतम्-अरण्य-57-(16-21)

[5]चित्रनैषधम् – 4-(25-28)

[7]चित्रनैषधम्- 4-54

[8]नैषधीयचरितम्-16-36